**CLASS : 10th (Secondary)** **Code No. 108**

**Series : Sec/Annual-2023**

रोल नं० | | | | | | | | | | |

**SET : C**

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः –***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टलेखः लेखनीयः।*



https://www.haryanaboard.com/

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

नियमपालनम् आज्ञापालनं वा अनुशासनं भवति। अनुशासनं जीवने परमम् आवश्यकमस्ति। परिवारे, समाजे राष्ट्रे च सर्वत्र अस्य आवश्यकता वर्तते। अस्य पालनेन उन्नतिर्भवति। यत्र अनुशासनं न भवति, तत्र कार्येषु अवनतिः भवति। नियमपालनस्य अभावे जीवनं दुष्करं भवेत्। यदि सर्वे जनाः स्वच्छन्दाः स्युः तदा समाजस्य स्थितिः अस्तव्यस्ता स्यात्।

*प्रश्नाः –*

(क) जीवने किम् आवश्यकम् अस्ति ?

(ख) अनुशासनं किं भवति ?

(ग) यत्र अनुशासनं न भवति, तत्र किं भवति ?

(घ) यदि सर्वे जनाः स्वच्छन्दाः स्युः, तदा किं स्यात् ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक-लेखनम्)**

**2.** देवः दिल्लीनगरे वसति। तस्य मित्रं सुमेरः हिमाचलप्रदेशे वसति। देवः गणतन्त्र-दिवसस्य शोभायात्रायां भागः गृहीतः। सः स्वानुभवान् स्वमित्रं सुमेरं प्रति पत्रं लिखति। मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $4 \times 1 = 4$

प्रिय मित्र सुमेर ! नव-दिल्लीतः

नमो नमः। तिथिः .............



https://www.haryanaboard.com/

अत्र कुशलं तत्रास्तु। अहं गणतन्त्रदिवसस्य कार्यक्रमे व्यस्तः आसम्। अतः .........(I).......... तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः।

अस्माकं विद्यालयस्य ..........(II)........... राजपथे स्वकलायाः प्रदर्शनम् अकरोत्। अहं .........(III)........ प्रमुखः सञ्चालकः आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः राजपथं गुञ्जितम् अकरोत्। स्वराष्ट्रस्य ........(IV)........... पराक्रमप्रदर्शनानि विचित्रवर्णानि लोकनृत्यानि च दृष्ट्वा अहं गौरवान्वितः अस्मि। मम बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। पितरौ वन्दनीयौ।

भवतः अभिन्नमित्रम्,

देवः।

**मञ्जूषा**

| गरवानृत्यस्य, विलम्बेन, सैन्यबलानां, वाद्यवृन्दं। |
|---|

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितमञ्जूषापदैः पूरयत – 4 × 1 = 4



(I) अस्मिन् चित्रे एकः ............. वृक्षः अस्ति।



https://www.haryanaboard.com/

(II) जले एकः ............. स्नानं करोति।

(III) चित्रे वृक्षस्य समीपे ............. अस्ति।

(IV) वृक्षस्य अधः ............. नृत्यति।

**मञ्जूषा**

| तडागः, विशालः, नरः, मयूरः। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम मित्रम्' इति विषयमधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखित गद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – 4

भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीनः इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारम् उद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?

**अथवा**

अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा – 'अनृतं वदसि चेत् काकः दशेत्' – इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम्, अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – $1 \times 4 = 4$

न चैनं सहसाक्रम्य जरा समधिरोहति।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च।।

**अथवा**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।



https://www.haryanaboard.com/

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – 2 × 2 = 4

(क) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

(ख) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

(ग) वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 3 × 1 = 3

भूकम्पेन भवनानि क्षणेनैव धराशायीनि जातानि। उत्खाता विद्युद्दीपस्तम्भाः। फालद्वये विभक्ता भूमिः।

***प्रश्नाः –***

(क) भूकम्पेन के उत्खाताः ?

(ख) फालद्वये का विभक्ता ?

(ग) क्षणेनैव भवनानि कीदृशानि जातानि ?

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत – 2 × 1 = 2

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

***प्रश्नौ –***

(क) प्रथमो धर्मः कः अस्ति ?

(ख) प्राणेभ्योऽपि विशेषतः किं रक्षेत् ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 3 × 1 = 3

(क) तत्र <u>राजसिंहः</u> नाम राजपुत्रः वसति स्म।

(ख) सः <u>भारवेदनया</u> क्रन्दति स्म।

(ग) धैर्यवान् <u>लोके</u> परिभवं न प्राप्नोति।

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः' पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4



https://www.haryanaboard.com/

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**11.** कर्ताकारकस्य *अथवा* सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**12.** वृद्धिसन्धेः *अथवा* व्यंजनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** द्विगुसमासस्य *अथवा* बहुव्रीहिसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** यथानिर्देशं शब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य षष्ठी-बहुवचने।

(ख) 'हरि' शब्दस्य चतुर्थी-एकवचने।

(ग) 'रमा' शब्दस्य षष्ठी-एकवचने।

(घ) 'साधु' शब्दस्य प्रथमा-एकवचने।

**15.** यथानिर्देशं धातुरूपाणि लिखत – $4 \times 1 = 4$

(क) 'दृश्' धातोः – लङ्लकारः, प्रथमपुरुषस्य, बहुवचने।

(ख) 'अस्' धातोः – लट्लकारः, मध्यमपुरुषस्य, एकवचने।

(ग) 'गम्' धातोः – लृट्लकारः, उत्तमपुरुषस्य, बहुवचने।

(घ) 'पा' धातोः – विधिलिङ्लकारः, प्रथमपुरुषस्य, एकवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु रिक्तस्थानानि उचितविभक्तिपदं चित्वा पूरयत – $4 \times 1 = 4$

(क) सुरेशः .............. प्रति गच्छति। (विद्यालयं, विद्यालयात्)

(ख) पिता .............. क्रुध्यति। (पुत्रेण, पुत्राय)

(ग) गंगा .............. प्रभवति। (हिमालयस्य, हिमालयात्)

(घ) गुरुः .............. स्निह्यति। (शिष्यात्, शिष्ये)

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $2 \times 1 = 2$

(I) .............. कुशली भवान् ? (कुत्र, अपि)

(II) भूकम्पितसमये .............. गमनमेव उचितम्। (बहिः, अन्तः)



https://www.haryanaboard.com/

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत् – $2 \times 1 = 2$

(I) अधिगच्छति

(II) निवार्यते

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत – $3 \times 1 = 3$

(I) यत् + न

(II) अन्योक्तयः

(III) रत्न + आकरः

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(I) यथाशक्ति

(II) भूतबलिः

(III) रामलक्ष्मणौ

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगः वियोगः वा करणीयः – $4 \times 1 = 4$

(I) गम् + क्त

(II) पठनीयः

(III) हतवान्

(IV) स्था + क्त्वा

**खण्डः 'ङ'**

**(बहुविकल्पीय-प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु एकं ***शुद्धम्*** उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'तनयः' इति पदस्य पर्यायपदं किम् ?

(I) भानुः (II) जाया

(III) सुतः (IV) शिवः

(ख) 'निर्माय' इति पदस्य विलोमपदं किम् ?

(I) विहस्य (II) विनाश्य

(III) विलिख्य (IV) विजित्य



https://www.haryanaboard.com/

(ग) 'हृदयग्राही स्पर्शः' अत्र किं विशेषणपदम् ?

(I) स्पर्शः (II) ग्राही

(III) हृदयग्राही (IV) हृदयः

(घ) 'श्लाघ्या कथा' अत्र किं विशेष्यपदम् ?

(I) कथा (II) श्लाघ्या

(III) गाथा (IV) कया

(ङ) '48' इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(I) अष्टत्रिंशत् (II) अष्टाचत्वारिंशत्

(III) अष्टादश (IV) अष्टपञ्चाशत्

(च) विद्यालयस्य अवकाशः .............. भवति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत)




(I) त्रिवादने (II) चतुर्वादने

(III) पञ्चवादने (IV) षड्वादने



https://www.haryanaboard.com/